# kalkikRitaM shivastotram

# શ્રીશિવસ્તોત્રં કલ્કિકૃતમ્

## Document Information

Text title : kalki kRitam shivastotra

File name : shivastotrakalki.itx

Category : shiva, stotra

Location : doc_shiva

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : Narch 4, 2004

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીશિવસ્તોત્રં કલ્કિકૃતમ્

શ્રીગણેશાય નમઃ ।
ગૌરીનાથં વિશ્વનાથં શરણ્યં ભૂતાવાસં વાસુકીકણ્ઠભૂષમ્ ।
ત્ર્યક્ષં પઞ્ચાસ્યાદિદેવં પુરાણં વન્દે સાન્દ્રાનન્દસન્દોહદક્ષમ્ ॥ ૧॥

યોગાધીશં કામનાશં કરાલં ગઙ્ગાસઙ્ગક્લિન્નમૂર્ધાનમીશમ્ ।
જટાજૂટાટોપરિક્ષિપ્તભાવં મહાકાલં ચન્દ્રભાલં નમામિ ॥ ૨॥

શ્મશાનસ્થં ભૂતવેતાલસઙ્ગં નાનાશસ્ત્રૈઃ સઙ્ગશૂલાદિભિશ્ચ ।
વ્યગ્રાત્યુગ્રા બાહવો લોકનાશે યસ્ય ક્રોધોદ્ભૂતલોકોઽસ્તમેતિ ॥ ૩॥

યો ભૂતાદિઃ પઞ્ચભૂતૈઃ સિસૃક્ષુસ્તન્માત્રાત્મા કાલકર્મસ્વભાવૈઃ ।
પ્રહૃત્યેદં પ્રાપ્ય જીવત્વમીશો બ્રહ્માનન્દે ક્રીડતે તં નમામિ ॥ ૪॥

સ્થિતૌ વિષ્ણુઃ સર્વજિષ્ણુઃ સુરાત્મા લોકાન્સાધૂન્ ધર્મસેતૂન્બિભર્તિ ।
બ્રહ્માદ્યંશે યોઽભિમાની ગુણાત્મા શબ્દાદ્યઙ્ગૈસ્તં પરેશં નમામિ ॥ ૫॥

યસ્યાજ્ઞયા વાયવો વાન્તિ લોકે જ્વલત્યગ્નિઃ સવિતા યાતિ તપ્યન્ ।
શીતાંશુઃ ખે તારકાસંગ્રહશ્ચ પ્રવર્તન્તે તં પરેશં પ્રપદ્યે ॥ ૬॥

યસ્ય શ્વાસાત્સર્વધાત્રી ધરિત્રી દેવો વર્ષત્યમ્બુકાલઃ પ્રમાતા ।
મેરુર્મધ્યે ભૂવનાનાં ચ ભર્તા તમીશાનં વિશ્વરૂપં નમામિ ॥ ૭॥

ઇતિ શ્રીકલ્કિપુરાણે કલ્કિકૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Ravindra Bhalekar ravibhalekar @ hotmail.com

Please send corrections to *sanskrit@cheerful.com*